# २८. यथा वदति तथा कुर्मः

द्वितीया

अध्यापकः - अखिलभारत-शिक्षक-सम्मेलनं भविष्यति। तत्र मनोरञ्जन कार्यक्रमान् कर्तुम् अवसरः अस्ति।

दीपकः - तर्हि वयम् एकं लघुनाटकं कुर्मः।

अर्चना - वयं सामूहिकगीतं गायामः।

अरुणः - अहम् एकपात्राभिनयं करोमि।

चेतनः - प्रदर्शिनी-आयोजनम् अस्ति वा ?

अध्यापकः - महती प्रदर्शिनी भविष्यति। के तस्य कार्यं कुर्वन्ति ?

अरविन्दः - वयं प्रदर्शिनीकार्यं कुर्मः। नूतनानि फलकानि लिखामः। बहूनि वस्तूनि सङ्गृह्णीमः। यन्त्रादीनि योजयामः। नवीनानि उपकरणानि रचयामः।

पल्लवी - आवां प्रार्थनां गायावः।

अध्यापकः - प्रबन्धकार्यं के निर्वहन्ति ?

श्रीनिधिः - अस्माकं गणः प्रबन्धकार्यं निर्वहति। आसानस्थापनम्, अन्ते निष्कासनकार्याणि अपि अस्मदीयाः एव कुर्वन्ति।

अध्यापकः - कार्यक्रमस्यानन्तरं तथैव मौनं धावन्ति चेत् ?

चिन्मयः - तथा न कुर्मः। यथा वदति तथैव कार्यं कुर्मः।